শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

সেৱা শ্রী শ্রীনিৱাসরাঘৱার্য মহাদেশিক ৱিরচিতম্

# ॥শ্রীলক্ষ্মীহযৱদন সুপ্রভাতম্॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

श्रीः
श्रीमते रामानुजाय नमः

# ॥श्रीलक्ष्मीहयवदन सुप्रभातम्॥

বেধোমুখৈর্বিধিবদর্চিতপাদপদ্ম
    বেদপ্রদান পরিকর্মিত হস্তপদ্ম।
বিশ্বানুপালনকৃতক্ষণনেত্রপদ্ম
    লক্ষ্মীহযাস্য ভগবন্ তব সুপ্রভাতম্॥ ১॥

যদবেধসাং প্রথমশিক্ষণমন্বতানীঃ
    বেধোবলেপবিহতিং পুনরভ্যকার্ষীঃ।
অত্যাদরাতপুনরিহাগতবান্ মদর্থে
    লক্ষ্মীহযাস্য ভগবন্ তব সুপ্রভাতম্॥ ২॥

নিদ্রাতুরে জগতি নীচপথপ্রবৃত্তে
    নেত্রে নিমীল্য নিগমাধবনি নির্বিশঙ্কে।
নিদ্রাং জহি ত্বম্ অধুনা মধুবোধনার্থং
    লক্ষ্মীহযাস্য ভগবন্ তব সুপ্রভাতম্॥ ৩॥

ত্বাং মাধবং মধুভিদং বহুমানমেযং
    মধবাশযা মধুলিহো বহুভাগধেযম্।
ভোক্তুং গৃণন্তি মধুমত্তমজিহ্বিযা দ্রাক
    লক্ষ্মীহযাস্য ভগবন্ তব সুপ্রভাতম্॥ ৪॥

শ্রুত্যা শ্রিযা সমুপসেবিতদিব্যরূপ
    স্মৃত্যাদিভিঃ সমুপবৃংহিতদিব্যনামন্।
ভক্তিপ্রপত্তিপরিপোষিতদিব্যতেজ
    লক্ষ্মীহযাস্য ভগবন্ তব সুপ্রভাতম্॥ ৫॥

হেষারব শ্রুতিরিতি শ্রুতমাত্মবিদ্ভিঃ
    হেষাং তবানুভবিতুং শ্রুতিমুদ্গৃণন্তি।
শ্রুত্বাদ্য জাগৃহি মযাপ্রতি বোধিতসসন
    লক্ষ্মীহযাস্য ভগবন্ তব সুপ্রভাতম্॥ ৬॥

www.prapatti.com

সাম্যং দদাসি পরমং ত্বদুপাসকানাং
    ৱেদান্তদেশিকগুরৌ প্রতিপন্নমেতম্।
ৱ্যাখ্যানকৌশলকরং শ্রুতিপুস্তকং চ
    লক্ষ্মীহযাস্য ভগৱন্ তৱ সুপ্রভাতম্॥ ৭ ॥

ৱেদান্তদেশিকগুরুস্তৱ পূজনায
    ত্বতপাদপঙ্কজ সমর্পিতসর্ৱভারঃ।
আস্তেধি সাত্বিকগণৈর্মণিমণ্ডপং তে
    লক্ষ্মীহযাস্য ভগৱন্ তৱ সুপ্রভাতম্॥ ৮ ॥

॥ ইতি শ্রীলক্ষ্মীহযৱদন সুপ্রভাতং সংপূর্ণম্ ॥

www.prapatti.com